Roll No. :

कुल प्रश्नों की संख्या : 18]
Total No. of Questions : 18]

[कुल मुद्रित पृष्ठों की संख्या : 12
[Total No. of Printed Pages : 12

# K-241090-C

## हाई स्कूल परीक्षा / High School Examination

## विषय : संस्कृत
## Subject : Sanskrit

समय : 3 घण्टे]
Time : 3 Hours]

[पूर्णांक : 75
[Maximum Marks : 75

**नोट :-** (i) सर्वे प्रश्ना: समाधेय:।

(ii) सुन्दरं सुस्पष्टञ्च लिखत।

**सामान्य निर्देश :-**

| | | |
|---|---|---|
| प्रश्न-1 | गद्यांशस्य प्रश्नोत्तराणि - | 3 |
| प्रश्न-2 | गद्यांशस्य प्रश्नोत्तराणि - | 3 |
| प्रश्न-3 | श्लोकस्य प्रश्नोत्तराणि - | 3 |
| प्रश्न-4 | श्लोकस्य प्रश्नोत्तराणि - | 3 |
| प्रश्न-5 | समास विग्रहं कृत्वा नामानि लिखत - | 3 |

| | | |
|---|---|---|
| प्रश्न-6 | पद्‌योः उपसर्गं चित्वा लिखत् - | 3 |
| प्रश्न-7 | लकार परिवर्तनं कृत्वा लिखत - | 3 |
| प्रश्न-8 | प्रश्नोत्तराणि संस्कृत भाषाया लिखत - | 4 |
| प्रश्न-9 | प्रश्नोत्तराणि लिखत् - | 4 |
| प्रश्न-10 | स्वपाठ्यपुस्तकात चतस्रः सूक्ती लिखत अथवा प्रदत्त सूक्तिनाम् हिन्दी भाषाया भावार्थ लिखत् | 4 |
| प्रश्न-11 | द्वौ सुभाषित श्लौकौ लिखत अथवा अपूर्णो श्लौकौ पूरयत् - | 5 |
| प्रश्न-12 | (अ) स्व प्राचार्यं प्रति अवकाशाय प्रार्थना पत्र संस्कृत भाषया लिखत / अथवा पत्रे रिक्त स्थानानि पूरयत् पूर्णम् लिखतु | 4 |
| | (ब) अपठित गद्यांश - | 4 |
| प्रश्न-13 | द्वादश वाक्येषु संस्कृत भाषया निबन्धं लेखनं कुरुत - | 6 |
| प्रश्न-14 | अड्कयोः संस्कृत भाषायां लिखत - | 2 |
| प्रश्न-15 | सन्धि विच्छेदं कृत्वा नामानि लिखत - | 2 |
| प्रश्न-16 | प्रकृति प्रत्ययं च योजयित्वा वाक्यं पूर्ण लिखित - | 2 |
| प्रश्न-17 | वाच्यमवबोह्य नाम लिखत - | 2 |
| प्रश्न-18 | अ - उचितं शब्दं चित्वा लिखत - | 5 |
| | ब - रिक्त स्थानानि पूरयत् - | 5 |
| | स - उचितं स्तम्भं सुमेलनं कुरुत - | 5 |

प्रश्न-1 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नान् उत्तरत् – [1x3=3]

तडागे गत्वा श्रृगाल: सम्यक् स्नानमकरोत्। तथा च लोष्ठोपरि जलमक्षिपत्। जलपातेनलोष्ठं गलितं जातम्। श्रृगाल: अवदत्-मित्र! आगच्छतु आगच्छतु। यदा लोष्ठं जलात् बहि: न आगच्छत् तदा श्रृगाल: तडागमकथयत् - मह्यं मम मित्रं देहि, अन्यथा मत्स्यं देहि।

प्रश्ना:

(क) तड़ागे गत्वा क: सम्यक स्नानमकरोत्?

(ख) 'जलपातेन लोष्ठं गलितं जातम्।' इत्यस्य वाक्यस्य हिन्दी भाषया अनुवादं कुरूत?

(ग) 'जम्बुक:' इति पदस्य पर्याय पदं किम् अस्ति?

प्रश्न-2 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नान् उत्तरत् - [1x3=3]

बिलासा स्वकार्येण न केवलं स्व समाजे अपितु समस्त-छत्तीसगढ प्रान्ते सम्मानीतास्ति। सम्प्रति छत्तीसगढ-सर्वकारेण मत्स्यपालनक्षेत्रं प्रोत्साहनार्थं तया नाम्ना 'बिलासाबाई केवंटिन' इति पुरस्कार: प्रति वर्षं दीयते। अपि च तया नाम्ना बिलासपुरे बिलासाताल:, बिलासाकन्या-स्नातकोत्तर-महाविद्यालय:, बिलासाचतुष्पथ: प्रभृतय: गौरवान्विता: सन्ति। एवमेव छत्तीसगढस्य पूज्या बिलासा साहस-शौर्य-कर्मनिष्ठाक्षेत्रेषु आदर्शभूतास्ति।

प्रश्ना:

(क) 'पूज्या बिलासा' इत्यनयो: पद्यो: विशेष्यपदं किम् अस्ति?

(ख) 'मीन:' इत्यस्य पदस्य पर्यायपदं किम् अस्ति?

(ग) 'बिलासा स्वकार्येण छत्तीसगढप्रान्ते सम्मानीतास्ति। 'अस्य' वाक्यस्य हिन्दी भाषया अनुवादं कुरुत।

**प्रश्न-3** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत - [1x3=3]

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय॥

प्रश्नाः

(क) 'खलस्य' इति पदस्य विपर्ययपदं किम् अस्ति?

(ख) साधोः विद्या किमर्थं भवति?

(ग) 'खलस्य धनं मदाय भवति।' अस्य वाक्यस्य हिन्दी भाषया अनुवादं कुरुत?

**प्रश्न-4** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत - [1x3=3]

सेवमाने दृढं सूर्ये दिशमन्तक सेविताम्।
विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते॥

प्रश्नाः

(क) 'सेवमाने दृढं सूर्ये।' इति वाक्ये विशेषणपदं किम् अस्ति?

(ख) 'नारी' इत्यस्य पदस्यं पर्यायपदं किम् अस्ति?

(ग) 'स्त्री नोत्तरा दिक्प्रकाशते' अस्मिन् वाक्ये क्रियापदं किमस्ति?

**प्रश्न-5** समास विग्रहं कृत्वा तेषां नामन्यपि लिखत - [1x3=3]

(क) पञ्चवटी

(ख) पितरौ

(ग) चन्द्रमुखम्

**प्रश्न-6** अधोलिखितानि वाक्यानि संशोध्य लिखत - [1x3=3]

(क) मार्गे उभयत: वृक्षा: सन्ति।

(ख) श्री गणेशं नम:।

(ग) रवि: सर्पेण बिभेति।

**प्रश्न-7** निर्देशानुसारं लकार परिवर्तनं कृत्वा लिखत - [1x3=3]

(क) स: लेखं लेखिष्यति (लट् लकारे)।

(ख) सीता वनं गच्छति (लङ्ग लकारे)।

(ग) राम: पुस्तकं पठति (लोट लकारे)।

**प्रश्न-8** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृत भाषया लिखत - (कोऽपि चत्वार) [1x4=4]

(क) कोरबानगरं किमर्थं प्रसिध्दम्?

(ख) तृणानां केन सह विरोध: अस्ति?

(ग) कस्माद् बुध्दिनाशो भवति?

(घ) बिलासाया: विवाह: केन सह अभवत्?

(ङ) अस्माकं कर्त्तव्यं किम्?

(च) पुत्रं द्रष्टुं क: प्रस्थित:?

**प्रश्न-9** अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्न निर्माणं कुरुत (कोऽपि चत्वारः) [1x4=4]

(क) शिविना विना इदं दुष्करम्।

(ख) स्वामी आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्रः आसीत्।

(ग) बृहस्पतिः देवानां गुरुःमन्यते।

(घ) चौरस्य पाद ध्वनिना अतिथिः प्रबुध्दः।

(ङ) हस्तप्रक्षालनार्थम् ऋतम अस्ति।

**प्रश्न-10** स्व पाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1x4=4]

**अथवा**

अधः प्रदत्तसूक्तीनां हिन्दी भाषया भावार्थं लिखत -

(क) संमोहात् स्मृतिविभ्रमः।

(ख) छिद्रेष्वनर्थाः बहुली भवन्ति।

(ग) निशान्ते च पिबेत् पयः।

(घ) नास्ति त्यागसमं सुखम्।

**प्रश्न-11** स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषित श्लोकौ लिखत - [2½x2 =5]

**अथवा**

अधः द्वौ अपूर्णौ सुभाषित श्लोकौ प्रदीयते,

तौ श्लोकौ स्वपाठ्यपुस्तकाधारेण पूरयत -

(क) सर्वा विद्याः पुरा प्रोक्ताः ______।

______ संस्कृतं कामधेनुवत्॥

(ख) शैले शैले न माणिक्यं ______

______ चन्दनं न वने वने॥

प्रश्न-12 (अ) भवत्या नाम खुशी अस्ति। भवती स्वमानुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अत: अवकाशाय स्व प्राचार्यं प्रति संस्कृत भाषया प्रार्थना पत्रम् लिखतु। [1+2+1 =4]

अथवा

भवान बीजापुर नगरे विश्वजीत:। भवत: मित्रं आनन्द: कोरिया नगरे वसति। तं परीक्षायां सफलतायै वर्धापन-पत्रं। कोष्ठक प्रदत्त पदानां सहायता पुन: लिखत। [½x8 =4]

(अपश्यम्, विश्वजीत:, आगत:, तुभ्यम्, अधिकतरा, तत्रास्तु, बीजापुर नगरत:, आनन्द:)

स्थानम् (i)

दिनाङ्क: 26.11.2023

प्रिय मित्र (ii)

सप्रेम नमस्ते

अत्र कुशलं (iii) । अद्यैव तव परिणाम: (iv) । तव सफलतां ज्ञात्वा मम मनसि महती प्रसन्नता जाता। मम एषा प्रसन्नता (v) जाता यदा अहं तव नाम योग्यता-सूचौ (vi) । त्वया पञ्च-शतम् अंङका: प्राप्ता:। तव निश्चितरूपेण छात्रवृत्तिं प्राप्स्यसि। त्वया परिवारस्य विद्यालयस्य च नाम उज्जवलीकृतम्।

अस्याम् उज्जवल-सफलताम् अहं ___(vii)___ हार्दिक वर्धापनं यच्छामि उज्जवल भविष्याय च कामये। मातृपितृ चरणेषु प्रणामः।

तव मित्र

___(viii)___

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृत भाषया उतरत- [1x4 =4]

मातृभूमिः बहुविधैः द्रव्यैः अस्मान् उपकरोति तस्यै अस्माकमपि कर्त्तव्यं यत् वयं कायेन, मनसा, वाचा धनेन च स्वमातृभूमेः उन्नतिं कुर्याम्। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत्। अतएव कथितम्- "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"।

प्रश्नाः

(क) का अस्मान् उपकरोति?

(ख) वयं कस्याः उन्नतिं कुर्याम?

(ग) मातृभूमिं प्रति किं भवेत्?

(घ) अस्माकं देशवासिनां हृदयेषु किं भवेत?

**अथवा**

(क) गद्यांशस्य उपयुक्त शीर्षकं चिनुत? [1]

(ख) गद्यांशस्य सारांशीकरणं कुरूत? [3]

**प्रश्न-13** अध: प्रदत्त विषयेषु कमपि एकमधिकृत्य संस्कृत भाषया द्वादशवाक्यै: निबन्धं लिखत - |½x12 =6|

(क) बीटा (क्रिकेट)

(ख) पर्यावरणम्

(ग) मम दिनचर्या

(घ) प्रिय कवि : कालिदास:

**प्रश्न-14** निम्नलिखितयो: अङ्कयो: अनुवादं संस्कृत भाषया लिखत - [1x2=2]

(क) 110 (ख) 143

**प्रश्न-15** निम्नरेखाङ्कि पदूयो: सन्धिविच्छेदं कृत्वा नाम्नी लिखत - [1x2=2]

(क) मन: चञ्चलम् अस्ति।

(ख) राम: पितुर्राज्ञां पालयति।

**प्रश्न-16** निम्नरेखाङ्किकत फ्दूयो: प्रकृतिं प्रत्ययं च योजयित्वा वाक्यं पूर्णं लिखत - [1x2=2]

(क) दानशीला: वस्त्राणि दा + तुमुन आगच्छन्ति।

(ख) अग्ने उष्ण + तल् शितकाले रोचते।

**प्रश्न-17** यथानिर्देशं वाच्यं परिवर्तयत - [1x2=2]

(i) अहं पत्रं लिखामि। (कर्मवाच्ये)

(ii) शिशुना सुप्यते। (कर्तृवाच्य)

प्रश्न-18 (अ) उचितं विकल्पं चित्वा लिखत – [1x5=5]

(i) जागीरं बिलासाये दत्तवान् -

(क) कल्याणसाय:

(ख) सुरेन्द्रसाय:

(ग) मोहनसाय:

(घ) गजेन्द्रसाय:

(ii) 'बालका: इदानीं' क्रीडाक्षेत्रे क्रीडन्ति। अव्ययपदं वर्तते -

(क) बालका:

(ख) क्रीडाक्षेत्रे

(ग) इदानीं

(घ) क्रीडन्ति

(iii) स्वकीये प्रथम प्रयासे मङ्गलग्रहं प्रति यान प्रेक्षणे सफलताम अलभत् -

(क) अमेरिका

(ख) भारत:

(ग) सोवियत रूस:

(घ) यूरोपसंघ:

(iv) 'सुबन्त:' इति पदस्य सन्धिविच्छेदो अस्ति -

(क) सु + बन्त:

(ख) सुप् + अन्त:

(ग) सुब् + अन्त:

(घ) सुप + न्त:

(v) 'नम:' योगे विभक्ति: भवति -

(क) प्रथमा

(ख) तृतीया

(ग) चतुर्थी

(घ) षष्ठी

प्रश्न-18 (ब) उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत वाक्यं पुन: लिखत - [1x5=5]

(सह, उपसर्ग:, भाषितम्, अद्य, कामये)

(1) देशमाख्याति ______ ।

(2) 'प्रहरति' इति शब्दे 'प्र' ______ अस्ति।

(3) छात्र: शिक्षकेण ______ पठति।

(4) ______ मम जन्म दिवस:।

(5) न त्वहं ______ राज्यम्।

**प्रश्न-18** (स) उचितं स्तम्भं सुमेलनं कुरुत - [1x5=5]

| | (अ) | (ब) |
|---|---|---|
| (i) | वृक्षा: | सप्तमी विभक्ति: |
| (ii) | विजने | तृतीया विभक्ति: |
| (iii) | प्रीत्याम् | क्रेतुम् |
| (iv) | शिशुना | रोगाणाम पहारका: |
| (v) | आपणं यास्यति | प्रदेशे |